# Shri Govardhanashtakam

# શ્રીગોવર્ધનાષ્ટકમ્

## Document Information


Text title : govardhanAShTakam 3

File name : govardhanAShTakam.itx

Category : vishhnu, krishna, aShTaka, vishvanAthachakravartin, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Shri Govardhanashtakam

# શ્રીગોવર્ધનાષ્ટકમ્

કૃષ્ણપ્રસાદેન સમસ્તશૈલ
  સામ્રાજ્યમાપ્નોતિ ચ વૈરિણોઽપિ ।
શક્રસ્ય યઃ પ્રાપ બલિં સ સાક્ષા-
  દ્ગોવર્ધનો મે દિશતામભીષ્ટમ્ ॥ ૧॥

સ્વપ્રેષ્ઠહસ્તામ્બુજસૌકુમાર્ય
  સુખાનુભૂતેરતિભૂમિ વૃત્તેઃ ।
મહેન્દ્રવજ્રાહતિમપ્યજાનન્
  ગોવર્ધનો મે દિષતામભીષ્ટમ્ ॥ ૨॥

યત્રૈવ કૃષ્ણો વૃષભાનુપુત્ર્યા
  દાનં ગૃહીતું કલહં વિતેને ।
શ્રુતેઃ સ્પૃહા યત્ર મહત્યતઃ શ્રી
  ગોવર્ધનો મે દિષતામભિષ્ટમ્ ॥ ૩॥

સ્નાત્વા સરઃ સ્વશુ સમીર હસ્તી
  યત્રૈવ નીપાદિપરાગ ધૂલિઃ ।
આલોલયન્ ખેલતિ ચારુ સ શ્રી
  ગોવર્ધનો મે દિષતામભીષ્ટમ્ ॥ ૪॥

કસ્તૂરિકાભિઃ શયિતં કિમત્રે-
  ત્યૂહં પ્રભોઃ સ્વસ્ય મુહુર્વિતન્વન્ ।
નૈસર્ગિકસ્વીયશિલાસુગન્ધૈ-
  ર્ગોવર્ધનો મે દિષતામભીષ્ટમ્ ॥ ૫॥

વંશપ્રતિધ્વન્યનુસારવર્ત્મ
  દિદૃક્ષવો યત્ર હરિં હરિણ્યાઃ ।
યાન્ત્યો લભન્તે ન હિ વિસ્મિતાઃ સ
  ગોવર્ધનો મે દિષતામભીષ્ટમ્ ॥ ૬॥

યત્રૈવ ગઙ્ગામનુ નાવિ રાધાં
    આરોહ્ય મધ્યે તુ નિમગ્નનૌકઃ ।
કૃષ્ણો હિ રાધાનુગલો બભૌ સ
    ગોવર્ધનો મે દિષતામભીષ્ટમ્ ॥ ૭॥

વિના ભવેત્કિં હરિદાસવર્ય
    પદાશ્રયં ભક્તિરતઃ શ્રયામિ ।
યમેવ સપ્રેમ નિજેશયોઃ શ્રી
    ગોવર્ધનો મે દિષતામભીષ્ટમ્ ॥ ૮॥

એતત્પઠેદ્યો હરિદાસવર્ય
    મહાનુભાવાષ્ટકમાર્દ્રચેતાઃ ।
શ્રીરાધિકામાધવયોઃ પદાબ્જ
    દાસ્યં સ વિન્દેદચિરેણ સાક્ષાત્ ॥ ૯॥

ઇતિ મહામહોપાધ્યાયશ્રીવિશ્વનાથચક્રવર્તિવિરચિતં
    શ્રીગોવર્ધનાષ્ટકં સમાપ્તમ્ ।

*Shri Govardhanashtakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*